# Shivastutih

# શિવસ્તુતિઃ

## Document Information

Text title : shivastutiH 16 from pArameshvaratantra

File name : shivastutiHpArameshvaratantre.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : 6th paTala of Parameshvaragama Verses 77 to 108

Latest update : July 6, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 7, 2022

*sanskritdocuments.org*

# શિવસ્તુતિઃ

(પારમેશ્વરાગમાન્તર્ગતે)

નમઃ શિવાય રુદ્રાય નમ ઓઙ્કારરૂપિણે ।
ભક્તસ્થલસ્વરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૧॥

ગજચર્મામ્બરભૃતે વ્યાઘ્રચર્મધરાય તે ।
મહેશસ્થલરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૨॥

કપર્દિને સકલાય કકુદ્ભિધ્વજશોભિને ।
પ્રસાદસ્થલરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૩॥

નમઃ પરમાત્મને તુભ્યં પ્રાણલિઙ્ગસ્થલાત્મને ।
શુદ્ધસ્ફટિકવર્ણાય શિવલિઙ્ગાય તે નમઃ ॥ ૪॥

નીલકણ્ઠાય નિત્યાય નિર્મલાય પરાત્મને ।
શરણસ્થલરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૫॥

ત્રિશૂલમૃગહસ્તાય કુઠારભયપાણયે ।
શિવલિઙ્ગૈકરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૬॥

નમો દક્ષમખાન્તાય નમોઽન્ધકવિઘાતિને ।
નમઃ સર્વજ્ઞરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૭॥

પાર્વતીશાય પૃથવે પરાય પરમેષ્ઠિને ।
નમસ્તે નિત્યતૃપ્તાય શિવલિઙ્ગાય તે નમઃ ॥ ૮॥

નમસ્તે વેદરૂપાય નમઃ કન્થાનિષઙ્ગિણે ।
નમસ્ત્વનાદિબોધાય શિવલિઙ્ગાય તે નમઃ ॥ ૯॥

નાટિતાખિલભૂતાય નગજાર્ધશરીરિણે ।
નમઃ સ્વતન્ત્રતન્ત્રાય શિવલિઙ્ગાય તે નમઃ ॥ ૧૦॥

નમઃ શશાઙ્કચૂડાય શશાઙ્કાયુતરોચિષે ।

અલુપ્તશક્તયે નિત્યં શિવલિઙ્ગાય તે નમઃ ॥ ૧૧॥

નમઃ કૈલાસવાસાય નમસ્તે પુરઘાતિને ।
નમોઽસ્ત્વનન્તશક્તાય શિવલિઙ્ગાય તે નમઃ ॥ ૧૨॥

નિઃશ્વાસોત્પન્નવેદાય સાશ્વી(ક્ષિ)ભૂતત્રયીમતે । (શ્વાશ્વી)
નમસ્તે ભક્તિરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૧૩॥

કમલોદ્ભવવન્દ્યાય કપર્દિન્ જટિને નમઃ ।
કર્મક્ષયાત્મને તુભ્યં શિવલિઙ્ગાય તે નમઃ ॥ ૧૪॥

નમો ગણેશપુત્રાય નમસ્તે સ્કન્દસૂનવે ।
નમો બુદ્ધિસ્વરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૧૫॥

ગઙ્ગાધરાય ગોભર્ત્રે ગૌરીવક્ત્રાવલોકિને ।
નમો વિચારરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૧૬॥

વિશ્વેશ્વરાય વિશ્વાય વિશ્વરૂપાય વેધસે ।
દર્પક્ષયસ્વરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૧૭॥

સર્વસધારાય સર્વાય સર્વોત્પત્તિલયાત્મને ।
સમ્યગ્જ્ઞાનસ્વરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૧૮॥

મૃત્યુઞ્જયાય રુદ્રાય ત્ર્યમ્બકાય ત્રિમૂર્તયે ।
મહાવીર્યાય વીરાય શિવલિઙ્ગાય તે નમઃ ॥ ૧૯॥

વેદવેદાન્તવેદ્યાય વેદાર્થાય વિવેકિને ।
મહસે યશસે તુભ્યં શિવલિઙ્ગાય તે નમઃ ॥ ૨૦॥

સોમસૂર્યાગ્નિનેત્રાય નમસ્તે ત્વષ્ટમૂર્તયે ।
નમો મહાશ્રીરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૨૧॥

નિરાકારાય કવયે કારણાય કલાત્મને ।
નિત્યજ્ઞાનસ્વરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૨૨॥

સૂર્યકોટિપ્રકાશાય સૂક્ષ્માય સુખરૂપિણે ।
શુદ્ધવૈરાગ્યરૂપાય શિવલિઙ્ગાય તે નમઃ ॥ ૨૩॥

નમઃ ષડ્ભાગ્યરૂપાય નમઃ ષડ્ભાગ્યદાયિને ।
મુક્તયે મુક્તિસન્ધાત્રે શિવલિઙ્ગાય તે નમઃ ॥ ૨૪॥

અતીતત્ર્યષ્ટતત્ત્વાય ત્ર્યષ્ટતત્ત્વસ્વરૂપિણે ।
પઞ્ચવિંશાત્મતત્ત્વાય શિવલિઙ્ગાય તે નમઃ ॥ ૨૫॥

વરદમૃગકુઠારાભીતિહસ્તામ્બુજાય
    સ્ફુટમુકુટવિરાજચ્ચન્દ્રમઃશેખરાય ।
મૃદુલવિમલદૂર્વાશ્લિષ્ટભુભૃત્સુતાય
    પ્રણવમય નમઃ શ્રીશઙ્કરાયોં નમસ્તે ॥ ૨૬॥

ફલશ્રુતિઃ -
ઇતિ સ્તુવીત યો ભક્ત્યા ત્રિસન્ધ્યં પ્રત્યહં શિવે ।
તદ્દૃષ્ટિગોચરાઃ સર્વે શિવા એવ ન સંશયઃ ॥ ૨૭॥

એતદ્વિજાનતો દેવિ નાન્યદસ્તિ તતઃ પરમ્ ।
જ્ઞાતવ્યં પરતત્ત્વાખ્યં સોઽહમેવ ન સંશયઃ ॥ ૨૮॥

અનેન સ્તવરાજેન ભાવયેન્મામધીશ્વરમ્ ।
દેહાન્તે સર્વમાપ્નોતિ મમ સાયુજ્યમવ્યયમ્ ॥ ૨૯॥

વિચારયેદેતદર્થં સમ્યગ્ ગુરુમુખાચ્છિવે ।
ન સ ભૂયો નિપતતિ સંસારે દુઃખસાગરે ॥ ૩૦॥

પરિત્યજ્યાપિ સર્વસ્વં સર્વયત્નેન સર્વદા ।
સર્વદા વર્તયેદેતદ્ યદીચ્છેત્ સુખમાત્મનઃ ॥ ૩૧॥

॥ ઇતિ શ્રીપારમેશ્વરાગમાન્તર્ગતે શિવસ્તુતિઃ સમ્પૂર્ણા ॥

6th paTala of Parameshvaragama/Parameshvaratantra Verses 77 to 108
Encoded and proofread by Ruma Dewan

*Shivastutih*

pdf was typeset on July 7, 2022

Please send corrections to *sanskrit@cheerful.com*